29-08-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यपत्रम् । संस्कृतानुवादः ।

1. किसी लड़के ने मुझे कलम दी → कश्चिद् बालकः मह्यं कलमम् अददत् ।
2. यह किसी गरीब का घर है → इदं कस्यचिद् निर्धनस्य गृहमस्ति ।
3. किन्हीं लड़कों द्वारा कोई चोर पीटा गया → कैश्चिद् बालकैः कश्चित् चौरः ताडितः ।
4. किसी वृक्ष से पत्ते गिरे → कस्मात्चित् वृक्षात् पत्राणि अपतन् ।
5. किसी लड़की को देखो → काञ्चित् बालिकाम् पश्य ।
6. किसी गाँव से दो छात्र आए → कस्मात्चित् ग्रामात् द्वौ छात्रौ आगच्छताम् ।
7. किसी उद्यान में कोई लड़की घूम रही है → कस्मिंश्चित् । कस्मिन्चित् उद्याने काचित् बालिका भ्रमन् अस्ति ।
8. घूम रही थी → भ्रमन् आसीत् या भ्रमति स्म ।
9. किसी तालाब में तीन मछलियाँ रहती थीं → कस्मिन्चित् तडागे तिस्रः मत्स्याः वसन्ति स्म ।
10. इस विद्यालय में तीन अध्यापक हैं → अस्मिन् विद्यालये त्रयः शिक्षकाः सन्ति ।
11. इन वृक्षों पर पक्षी निवास करते हैं → एषु वृक्षेषु खगाः निवसन्ति ।
12. उन लड़कों को देखो → तान् बालकान् पश्य ।
13. उन लड़कियों में → तासु बालिकासु ।
14. सभी लड़कियाँ → सर्वाः बालिकाः ।

(signature) 29-08-2020

डॉ० निर्मल कुमार झा, ( स० प्राचार्यः) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

संस्कृतसामान्यम् । उपशास्त्री II 29-08-2020

अनिवार्यपत्रम् निबन्ध :

# " छात्रजीवने अनुशासनम् । "

तत्र चतुर्विधः आश्रमः भवति – ब्रह्मचर्यः, गृहस्थः, वाणप्रस्थः, संन्यासश्च । चतुर्षु आश्रमेषु ब्रह्मचर्यः प्रमुखः भवति । ब्रह्मचर्यावस्था एव छात्रजीवनं भवति । एष कालः जनानां निर्माणकालः । अस्मिन् काले छात्राः ब्रह्मचर्यं पालयन्ति । अध्ययन तथा च स्वाध्याय-माध्यमेन ज्ञानं लभन्ते । अस्य ज्ञानस्योपयोगं ते गृहस्थजीवने कुर्वन्ति । सफलजीवनयापनाय अनुशासनस्यातीवावश्यकता वर्तते ।

शासनम् अनु अनुशासनम् अर्थात् मानवसमाजनिर्मितेन नियमानि पालयन्तः लोकाः अनुशासिताः कथ्यन्ते । अनुशासनाभावे समाजे मानवजीवने च उच्छृङ्खलता आयाति । सर्वे स्वेच्छाचारं कुर्वन्तः न कथमपि आत्मोन्नतिं समाजोन्नतिञ्च कर्तुं समर्थाः भवन्ति । पारिवारिकी सामाजिकी च व्यवस्था नंक्ष्यति । विद्यार्थिनः उद्दण्डाः भविष्यन्ति । समाजे देशे च सर्वत्र अराजकता भविष्यति । अतएव छात्राणां कृते अनुशासनं परमावश्यकं वर्तते । छात्राणां कृते विद्यालय एव अनुशासनशिक्षाकेन्द्रमस्ति । अस्मिन्नेव काले छात्राणां मनःसु यः प्रभावः सम्पद्यते सः स्थायी भवति । बाल्ये अनुशासनहीनाः जना वयसि प्राप्ते अनुशासिता भविष्यन्ति इति दुराशामात्रम् । यथा क्रियते तथैव भुज्यते । अद्यत्यः छात्राः श्वः देशस्य कर्णधाराः भविष्यन्ति । अतएवानुशासनं छात्रजीवनस्य सफलतायाः कुञ्जिका ।

29-08-2020

डॉ० निर्मल कुमार झा, ( स० प्राचार्यः ) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

29-08-2020

शास्त्री II

अनिवार्यपत्रम् ।

व्याकरणछात्रेभ्यः

रघुवंशम् ।

श्लोकव्याख्या ।

"कुलेन कान्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः ।
त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समागच्छतु काञ्चनेन ॥"

**सन्दर्भः** → पूर्ववत्

**प्रसङ्गः** → इन्दुमतीं प्रति अजः सर्वविधयोग्यः विवाहार्थं अस्तीति कविरत्र सुनन्दावचनमाध्यमेन प्रतिपादयति ।

**अन्वयः** → कुलेन कान्त्या नवेन वयसा विनयप्रधानैः तैः तैः गुणैः आत्मनः तुल्यम् अमुं त्वं वृणीष्व । रत्नं काञ्चनेन समागच्छतु ।

**शब्दार्थः व्याकरणञ्च** → कुलेन = वंशेन । कान्त्या = सौन्दर्येण । नवेन = नूतनेन । वयसा = यौवनेन । विनयप्रधानैः → विनय एव प्रधानं येषु, तैः = उदारगुणविशेषैः । तैस्तैः = ख्यातैः । गुणैः = सत्यदानादिधर्मैः । आत्मनः = स्वस्य । तुल्यम् = अनुरूपम् । अमुम् = अजम् । त्वम् = इन्दुमती । वृणीष्व = स्वीकुरुष्व । रत्नं = मणिः । काञ्चनेन = सुवर्णेन । समागच्छतु = समागमं प्रार्थयत ।

**तात्पर्यः** → सुनन्दा इन्दुमतीं प्रति कथयति यत् अयमजः रघु-कुलशिरोमणिः रूपगुणवयानुसारेण तुभ्यं सर्वथा योग्यः। त्वमजं स्वीकुरुष्व विवाहार्थं । येन काञ्चनेन सह रत्नं समागच्छतु ।

**विशेषः** → शृङ्गाररसः। वैदर्भीरीतिः। प्रसादगुणः। अर्थान्तरन्यासालंकारः उपजातिछन्दश्च ।

[signature] 29-08-2020

डॉ० निर्मल कुमार झा (सं० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।